# .. Gayatri Mantra-s ..

## ॥ गायत्रीमन्त्राः ॥

सूर्य
ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

ॐ भास्कराय विद्महे महद्युतिकराय धीमहि ।
तन्न आदित्यः प्रचोदयात् ॥

ॐ आदित्याय विद्महे सहस्रकिरणाय धीमहि ।
तन्नो भानुः प्रचोदयात् ॥

ॐ प्रभाकराय विद्महे दिवाकराय धीमहि ।
तन्नः सूर्यः प्रचोदयात् ॥

ॐ अश्वध्वजाय विद्महे पाशस्ताय धीमहि ।
तन्नः सूर्यः प्रचोदयात् ॥

चन्द्र
ॐ क्षीरपुत्राय विद्महे महाकालाय धीमहि ।
तन्नश्चन्द्रः प्रचोदयात् ॥

ॐ क्षीरपुत्राय विद्महे अमृतत्वाय धीमहि ।
तन्नश्चन्द्रः प्रचोदयात् ॥

ॐ निशाकराय विद्महे कलानाथाय धीमहि ।
तन्नः सोमः प्रचोदयात् ॥

अंगारक
ॐ वीरध्वजाय विद्महे विघ्नहस्ताय धीमहि ।
तन्नो भौमः प्रचोदयात् ॥

ॐ अंगारकाय विद्महे भूमिपालाय धीमहि ।
तन्नः कुजः प्रचोदयात् ॥

ॐ चित्रिपुत्राय विद्महे लोहितांगाय धीमहि ।
तन्नो भौमः प्रचोदयात् ॥

बुध
ॐ गजध्वजाय विद्महे सुखहस्ताय धीमहि ।
तन्नो बुधः प्रचोदयात् ॥

ॐ चन्द्रपुत्राय विद्महे रोहिणी प्रियाय धीमहि ।
तन्नो बुधः प्रचोदयात् ॥

गुरु
ॐ वृषभध्वजाय विद्महे क्रुनिहस्ताय धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥

ॐ सुराचार्याय विद्महे सुरश्रेष्ठाय धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥

शुक्र
ॐ अश्वध्वजाय विद्महे धनुर्हस्ताय धीमहि ।
तन्नः शुक्रः प्रचोदयात् ॥

ॐ रजदाभाय विद्महे भृगुसुताय धीमहि ।
तन्नः शुक्रः प्रचोदयात् ॥

शनीश्वर
ॐ काकध्वजाय विद्महे खड्गहस्ताय धीमहि ।
तन्नो मन्दः प्रचोदयात् ॥

ॐ शनैश्वराय विद्महे सूर्यपुत्राय धीमहि ।
तन्नो मन्दः प्रचोदयात् ॥

राहु
ॐ नाकध्वजाय विद्महे पद्महस्ताय धीमहि ।
तन्नो राहुः प्रचोदयात् ॥

केतु
ॐ अश्वध्वजाय विद्महे शूलहस्ताय धीमहि ।
तन्नः केतुः प्रचोदयात् ॥

ॐ चित्रवर्णाय विद्महे सर्परूपाय धीमहि ।
तन्नः केतुः प्रचोदयात् ॥

पृथ्वी
ॐ पृथ्वी देव्यै विद्महे सहस्रमर्त्यै च धीमहि ।
तन्नः पृथ्वी प्रचोदयात् ॥

ब्रह्मा
ॐ चतुर्मुखाय विद्महे हंसारूढाय धीमहि ।
तन्नो ब्रह्मा प्रचोदयात् ॥

ॐ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि ।
तन्नो ब्रह्मा प्रचोदयात् ॥

ॐ चतुर्मुखाय विद्महे कमण्डलुधराय धीमहि ।
तन्नो ब्रह्मा प्रचोदयात् ॥

ॐ परमेश्वराय विद्महे परमतत्त्वाय धीमहि ।
तन्नो ब्रह्मा प्रचोदयात् ॥

विष्णु
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

नारायण
ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

वेंकटेश्वर
ॐ निरंजनाय विद्महे निरपाशाय (?) धीमहि ।
तन्नः श्रीनिवासः प्रचोदयात् ॥

राम
ॐ रघुवंशयाय विद्महे सीतावल्लभाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥

ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥

ॐ भरताग्रजाय विद्महे सीतावल्लभाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥

ॐ भरताग्रजाय विद्महे रघुनन्दनाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥

कृष्ण
ॐ देवकीनन्दनाय विद्महे वासुदेवाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ॥

ॐ दामोदराय विद्महे रुक्मिणीवल्लभाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ॥

ॐ गोविन्दाय विद्महे गोपीवल्लभाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ।

गोपाल
ॐ गोपालाय विद्महे गोपीजनवल्लभाय धीमहि ।
तन्नो गोपालः प्रचोदयात् ॥

पाण्डुरंग
ॐ भक्तवरदाय विद्महे पाण्डुरंगाय धीमहि ।
तन्नः कृष्णः प्रचोदयात् ॥

नृसिंह
ॐ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि ।
तन्नो नारसिꣳहः प्रचोदयात् ॥

ॐ नृसिंहाय विद्महे वज्रनखाय धीमहि ।

तन्नः सिंहः प्रचोदयात् ॥

परशुराम
ॐ जामदग्न्याय विद्महे महावीराय धीमहि ।
तन्नः परशुरामः प्रचोदयात् ॥

इन्द्र
ॐ सहस्रनेत्राय विद्महे वज्रहस्ताय धीमहि ।
तन्न इन्द्रः प्रचोदयात् ॥

हनुमान
ॐ आंजनेयाय विद्महे महाबलाय धीमहि ।
तन्नो हनूमान् प्रचोदयात् ॥।

ॐ आंजनेयाय विद्महे वायुपुत्राय धीमहि ।
तन्नो हनूमान् प्रचोदयात् ॥

मारुती
ॐ मरुत्पुत्राय विद्महे आंजनेयाय धीमहि ।
तन्नो मारुतिः प्रचोदयात् ॥

दुर्गा
ॐ कात्यायनाय विद्महे कन्यकुमारी च धीमहि ।
तन्नो दुर्गा प्रचोदयात् ॥

ॐ महाशूलिन्यै विद्महे महादुर्गायै धीमहि ।
तन्नो भगवती प्रचोदयात् ॥

ॐ गिरिजायै च विद्महे शिवप्रियायै च धीमहि ।
तन्नो दुर्गा प्रचोदयात् ॥

शक्ति
ॐ सर्वसंमोहिन्यै विद्महे विश्वजनन्यै च धीमहि ।
तन्नः शक्तिः प्रचोदयात् ॥

काली

ॐ कालिकायै च विद्महे श्मशानवासिन्यै च धीमहि ।
तन्न अघोरा प्रचोदयात् ॥

ॐ आद्यायै च विद्महे परमेश्वर्यै च धीमहि ।
तन्नः कालीः प्रचोदयात् ॥

देवी
ॐ महाशूलिन्यै च विद्महे महादुर्गायै धीमहि ।
तन्नो भगवती प्रचोदयात् ॥

ॐ वाग्देव्यै च विद्महे कामराज्ञै च धीमहि ।
तन्नो देवी प्रचोदयात् ॥

गौरी
ॐ सुभगायै च विद्महे काममालिन्यै च धीमहि ।
तन्नो गौरी प्रचोदयात् ॥

लक्ष्मी
ॐ महालक्ष्मी च विद्महे विष्णुपत्नीश्च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

सरस्वती
ॐ वाग्देव्यै च विद्महे विरिंचिपत्न्यै च धीमहि ।
तन्नो वाणी प्रचोदयात् ॥

सीता
ॐ जनकनन्दिन्यै विद्महे भूमिजायै च धीमहि ।
तन्नः सीता प्रचोदयात् ॥

राधा
ॐ वृषभानुजायै विद्महे कृष्णप्रियायै धीमहि ।
तन्नो राधा प्रचोदयात् ॥

अन्नपूर्णा
ॐ भगवत्यै च विद्महे माहेश्वर्यै च धीमहि ।
तन्न अन्नपूर्णा प्रचोदयात् ॥

तुलसी
ॐ तुलसीदेव्यै च विद्महे विष्णुप्रियायै च धीमहि
तन्नो बृन्दः प्रचोदयात् ॥

महादेव
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

रुद्र
ॐ पुरुषस्य विद्महे सहस्राक्षस्य धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

शंकर
ॐ सदाशिवाय विद्महे सहस्राक्ष्याय धीमहि ।
तन्नः साम्बः प्रचोदयात् ॥

नन्दिकेश्वर
ॐ तत्पुरुषाय विद्महे नन्दिकेश्वराय धीमहि ।
तन्नो वृषभः प्रचोदयात् ॥

गणेश
ॐ तत्कराटाय विद्महे हस्तिमुखाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ॥

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

ॐ तत्पुरुषाय विद्महे हस्तिमुखाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ॥

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

ॐ लम्बोदराय विद्महे महोदराय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

षण्मुख
ॐ षण्मुखाय विद्महे महासेनाय धीमहि ।
तन्नः स्कन्दः प्रचोदयात्॥

ॐ षण्मुखाय विद्महे महासेनाय धीमहि ।
तन्नः षष्ठः प्रचोदयात् ॥

सुब्रह्मण्य
ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि ।
तन्नः षण्मुखः प्रचोदयात् ॥

ॐ
ॐ ॐकाराय विद्महे डमरुजातस्य धीमहि ।
तन्नः प्रणवः प्रचोदयात् ॥

अजपा
ॐ हंस हंसाय विद्महे सोऽहं हंसाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥

दक्षिणामूर्ति
ॐ दक्षिणामूर्तये विद्महे ध्यानस्थाय धीमहि ।
तन्नो धीशः प्रचोदयात् ॥

गुरु
ॐ गुरुदेवाय विद्महे परब्रह्मणे धीमहि ।
तन्नो गुरुः प्रचोदयात् ॥

हयग्रीव
ॐ वागीश्वराय विद्महे हयग्रीवाय धीमहि ।

तन्नो हंसः प्रचोदयात् ॥

अग्नि
ॐ सप्तजिह्वाय विद्महे अग्निदेवाय धीमहि ।
तन्न अग्निः प्रचोदयात् ॥

ॐ वैश्वानराय विद्महे लालीलाय धीमहि ।
तन्न अग्निः प्रचोदयात् ॥

ॐ महाज्वालाय विद्महे अग्निदेवाय धीमहि
तन्नो अग्निः प्रचोदयात् ॥

यम
ॐ सूर्यपुत्राय विद्महे महाकालाय धीमहि ।
तन्नो यमः प्रचोदयात् ॥

वरुण
ॐ जलबिम्बाय विद्महे नीलपुरुषाय धीमहि ।
तन्नो वरुणः प्रचोदयात् ॥

वैश्वानर
ॐ पावकाय विद्महे सप्तजिह्वाय धीमहि ।
तन्नो वैश्वानरः प्रचोदयात् ॥

मन्मथ
ॐ कामदेवाय विद्महे पुष्पवनाय धीमहि ।
तन्नः कामः प्रचोदयात् ॥

हंस
ॐ हंस हंसाय विद्महे परमहंसाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥

ॐ परमहंसाय विद्महे महत्तत्त्वाय धीमहि ।
तन्नो हंसः प्रचोदयात् ॥

नन्दी

ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि ।
तन्नो नन्दिः प्रचोदयात् ॥

गरुड
ॐ तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि ।
तन्नो गरुडः प्रचोदयात् ॥

सर्प
ॐ नवकुलाय विद्महे विषदन्ताय धीमहि ।
तन्नः सर्पः प्रचोदयात् ॥

पांचजन्य
ॐ पांचजन्याय विद्महे पावमानाय धीमहि ।
तन्नः शंखः प्रचोदयात् ॥

सुदर्शन
ॐ सुदर्शनाय विद्महे महाज्वालाय धीमहि ।
तन्नश्चक्रः प्रचोदयात् ॥

Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated April 25, 2010
http://sanskritdocuments.org